# KĀLACAKRA-TANTRA AND OTHER TEXTS

## PART 1

edited by

Prof. Dr. RAGHU VIRA, M. A., D. Litt. et Phil.

and

Prof. Dr. LOKESH CHANDRA, M. A., D. Litt.

International Academy of Indian Culture

New Delhi, June 1966

# ŚATA-PIṬAKA SERIES

## INDO-ASIAN LITERATURES

**Volume 69**

**Reproduced in original scripts and languages**
Translated, annotated and critically evaluated by
specialists of the East and the West
in a Series of Collectanea

*Founded by*
**RAGHU VIRA** *M.A., Ph.D., D.Litt. et Phil.*

**आचार्य-रघुवीर-समुपक्रान्तं**

**जम्बुद्वीप-राष्ट्राणां**
(भारत-नेपाल-गान्धार-शूलिक-तुरुष्क-पारस-ताजक-भोट-चीन-मोंगोल-मञ्जु-
उदयवर्ष-सिंहल-सुवर्णभू-श्याम-कम्बुज-चम्पा-द्वीपान्तरादीनां )

**एकैकेषां समस्रोतसां संस्कृति-साहित्य-समुच्चय-
सरितां सागरभूतं**

# शतपिटकम्

Copyright by the
INTERNATIONAL ACADEMY OF INDIAN CULTURE
J22 Hauz Khas Enclave
New Delhi 16 (India)

*All rights reserved, including the right to
reprint, translate or to reproduce this
book or parts thereof in any form.*

Price: Rs. 50.

June 1966

Printed by the
Academy's own printing works
the Arya Bharati Mudranalaya
New Delhi-16

## CONTENTS


Preface 5

Ḥjam dpal ye śes sems dpaḥi don dam paḥi mtshan yaṅ dag par brjod pa: Mañjuśrī jñānasattva-yin ünemlekü ner-e-yi üneger ögülegči 1

मञ्जुश्रीज्ञानसत्वस्य परमार्था नामसंगीतिः 31


Dbaṅ mdor bstan: Abisig-i quriyan uqaγulqui (सेकोद्देशः) 35

Mchog gi daṅ poḥi saṅs rgyas las phyuṅ ba rgyud kyi rgyal po dpal dus kyi ḥkhor lo zhes bya ba: Angqan-u degedü burqan-ača γarγaγsan čoγtu čaγ-un kürdün neretü dandaris-un qaγan (for the page numbers of the different chapters see the next title in Sanskrit) 53

परमादिबुद्धोद्धृतश्रीकालचक्रतन्त्रराजः

| | | |
|---|---|---|
| लोकधातुविन्यासपटलः | (T.* & M.* p. 53) | 332 |
| अध्यात्मनिर्णयपटलः | ( T. & M. p. 99 ) | 339 |
| अभिषेकपटलः | (T. & M. p. 145) | 348 |
| साधनपटलः | (T. & M. p. 198) | 356 |
| ज्ञानपटलः | (T. & M. p. 261) | 366 |

# ॥ मञ्जुश्रीज्ञानसत्त्वस्य परमार्था नामसंगीतिः ॥



## ॥ मञ्जुश्रीज्ञानसत्त्वस्य परमार्था नामसंगीतिः ॥

॥ नमो मञ्जुश्री-कुमारभूताय ॥

अथ वज्र-धरः श्रीमान् दुर्दान्त-दमकः परः ।
त्रि-लोक-विजयी वीरो गुह्य-राट् कुलिशेश्वरः ॥ १ ॥
विबुद्ध-पुण्डरीकाक्षः प्रोत्फुल्ल-कमलाननः ।
प्रोल्लालयन् वज्र-वरं स्व-करेण मुहुर् मुहुः ॥ २ ॥
भृकुटी-तरङ्ग-प्रमुखैर् अनन्तैर् वज्र-पाणिभिः ।
दुर्दान्त-दमकैर् वीरैर् वीर-बीभत्स-रूपिभिः ॥ ३ ॥
उल्लालयद्भिः स्व-करैः प्रस्फुरद्-वज्र-कोटिभिः ।
प्रज्ञोपाय-महा-करुणा-जगद्-अर्थ-करैः परैः ॥ ४ ॥
हृष्ट-तुष्टाशयैर् मुदितैः क्रोध-विग्रह-रूपिभिः ।
बुद्ध-कृत्य-करैर् नाथैः सार्धं प्रणत-विग्रहैः ॥ ५ ॥
प्रणम्य नाथं सम्बुद्धं भगवन्तं तथागतम् ।
कृताञ्जलि-पुटो भूत्वा इदम् आह स्थितोऽग्रतः ॥ ६ ॥
मद्धिताय ममार्थाय अनुकम्पाय मे विभो ।
माया-जालाभिसम्बोधिं यथा लाभी भवाम्यहम् ॥ ७ ॥
अज्ञान-पङ्क-मग्नानां क्लेश-व्याकुल-चेतसाम् ।
हिताय सर्व-सत्त्वानाम् अनुत्तर-फलाप्तये ॥ ८ ॥
प्रकाशयतु सम्बुद्धो भगवान् शास्ता जगद्-गुरुः ।
महा-समय-तत्त्व-ज्ञ इन्द्रियाशय-वित् परः ॥ ९ ॥
भगवज्-ज्ञान-कायस्य महोष्णीषस्य गीष्पतेः ।
मञ्जुश्री-ज्ञान-सत्त्वस्य ज्ञान-मूर्त्तेः स्वयम्भुवः ॥ १० ॥
गम्भीरार्थाम् उदारार्थां महार्थाम् असमां शिवाम् ।
आदि-मध्यान्त-कल्याणीं नाम-सङ्गीतिम् उत्तमाम् ॥ ११ ॥
याऽतीतैर् भाषिता बुद्धैर् भाषिष्यन्ते ह्यनागताः ।
प्रत्युत्पन्नाश् च संबुद्धा यां भाषन्ते पुनः पुनः ॥ १२ ॥
माया-जाले महा-तन्त्रे या चास्मिन् सम्प्रगीयते ।
महा-वज्र-धरैर् हृष्टैर् अमेयैर् मन्त्र-धारिभिः ॥ १३ ॥
अहं चैनां धारयिष्याम्या निर्याणं दृढाशयः ।
यथा भवाम्यहं नाथ सर्व-सम्बुद्ध-गुह्य-धृक् ॥ १४ ॥
प्रकाशयिष्ये सत्त्वानां यथाशय-विशेषतः ।
अशेष-क्लेश-नाशाय अशेषाज्ञान-हानये ॥ १५ ॥
एवम् अध्येष्य गुह्येन्द्रो वज्र-पाणिस् तथागतम् ।
कृताञ्जलि-पुटो भूत्वा प्रह्व-कायः स्थितोऽग्रतः ॥ १६ ॥

॥ अध्येषण-गाथाः षोडश ॥

अथ शाक्य-मुनिर् भगवान् सुबुद्धो द्वि-पदोत्तमः ।
निर्णमय्यायतां स्फीतां सुजिह्वां स्व-मुखाच्छुभाम् ॥ १७ ॥
स्मितं संदर्श्य लोकानाम् अपाय-त्रय-शोधनम् ।
त्रैलोक्य-भास-करणं चतुर्-मारारि-शासनम् ॥ १८ ॥
त्रि-लोकम् आपूरयन्त्या ब्राह्मया मधुरया गिरा ।
प्रत्यभाषत गुह्येन्द्रं वज्र-पाणिं महा-बलम् ॥ १९ ॥
साधु वज्र-धर श्रीमन् साधु ते वज्र-पाणये ।
यस् त्वं जगद्धितार्थाय महा-करुणयाऽन्वितः ॥ २० ॥
महार्थां नाम-सङ्गीतिं पवित्राम् अघ-नाशनाम् ।
मञ्जुश्री-ज्ञान-कायस्य मत्तः श्रोतुं समुद्यतः ॥ २१ ॥
तत् साधु देशयाम्येषो अहं ते गुह्यकाधिप ।
शृणु त्वम् एकाग्र-मनास् तत् साधु भगवन्निति ॥ २२ ॥

॥ प्रतिवचन-गाथाः षट् ॥

अथ शाक्य- मुनिर् भगवान् सकलं मन्त्र-कुलं महत् ।
मन्त्र-विद्या-धर-कुलं व्यवलोक्य कुल-त्रयम् ॥ २३ ॥
लोक-लोकोत्तर-कुलं लोकालोक-कुलं महत् ।
महा-मुद्रा-कुलं चाग्र्यं महोष्णीष-कुलं महत् ॥ २४ ॥

॥ षट्-कुलावलोकन-गाथे द्वे ॥

इमां षण्-मन्त्र-राजानं संयुक्ताम् अद्वयोदयाम् ।
अनुत्पाद-धर्मिणीं गाथां भाषते स्म गिरां पतेः ॥ २५ ॥
अ आ इ ई उ ऊ ए ऐ ओ औ अं अः स्थितो हृदि ।
ज्ञान-मूर्त्तिर् अहं बुद्धो बुद्धानां त्र्यध्व-वर्तिनाम् ॥ २६ ॥
ओं वज्र-तीक्ष्ण-दुःख-च्छेद-प्रज्ञा-ज्ञान-मूर्त्तये ।
ज्ञान-काय-वागीश्वरारपचनाय ते नमः ॥ २७ ॥

॥ माया-जालाभिसम्बोधि-क्रम-गाथास्तिस्रः ॥

तद्यथा भगवान् बुद्धः संबुद्धो ऽकार-सम्भवः ।
अकारः सर्व-वर्णाग्र्यो महार्थः परमाक्षरः ॥ २८ ॥
महा-प्राणो ह्यनुत्पादो वाग्-उदाहार-वर्जितः ।
सर्वाभिलाप-हेत्वग्र्यः सर्व-वाक्-सुप्रभास्वरः ॥ २९ ॥
महा-मह-महा-रागः सर्व-सत्त्व-रतिङ्-करः ।
महा-मत-महा-द्वेषः सर्व-क्लेश-महा-रिपुः ॥ ३० ॥

महा-मह-महा-म
महा-मह-महा-
महा-मह-महा-
महा-कामो मह
महा-रूपो महा-
महा-नामा महो
महा-प्रज्ञायुध-ध
महा-यशा महा
महा-माया-धरो
महा-माया-रति-
महा-दान-पतिः
महा-क्षान्ति-धरं
महा-ध्यान-समा
महा-बलो महोप
महा-मैत्री-मयो
महा-प्रज्ञो महा-
महा-ऋद्धि-बले
महर्द्धिको महेश
महा-भवाद्रि-सं
महा-क्रूरो महा
महा-विद्योत्तमं
महा-यान-नया
॥ वज्र-
महा-वैरोचनो
महा-मन्त्र-नयो
दश-पारमिता-
दश-पारमिता-
दश-भूमीश्वरो
दश-ज्ञान-विशु
दशाकारो दश
अशेष-विश्वार्थ
अनादिर् निष्
भूत-वादी यथ

# ॥ मञ्जुश्रीज्ञानसत्त्वस्य परमार्था नामसंगीतिः ॥

कृताञ्जलि-पुटो भूत्वा प्रह्व-कायः स्थितोऽग्रतः ॥ १६ ॥

॥ अध्येषण-गाथाः षोडश ॥

अथ शाक्य-मुनिर् भगवान् सुबुद्धो द्वि-पदोत्तमः ।
निर्णमय्यायतां स्फीतां सुजिह्वां स्व-मुखाच्छुभाम् ॥ १७ ॥
स्मितं संदर्श्य लोकानाम् अपाय-त्रय-शोधनम् ।
त्रैलोक्य-भास-करणं चतुर्-मारारि-शासनम् ॥ १८ ॥
त्रि-लोकम् आपूरयन्त्या ब्राह्मया मधुरया गिरा ।
प्रत्यभाषत गुह्येन्द्रं वज्र-पाणिं महा-बलम् ॥ १९ ॥
साधु वज्र-धर श्रीमन् साधु ते वज्र-पाणये ।
यस् त्वं जगद्धितार्थाय महा-करुणयाऽन्वितः ॥ २० ॥
महार्थां नाम-सङ्गीतिं पवित्राम् अघ-नाशनाम् ।
मञ्जुश्री-ज्ञान-कायस्य मत्तः श्रोतुं समुद्यतः ॥ २१ ॥
तत् साधु देशयाम्येषो अहं ते गुह्यकाधिप ।
शृणु त्वम् एकाग्र-मनास् तत् साधु भगवन्निति ॥ २२ ॥

॥ प्रतिवचन-गाथाः षट् ॥

अथ शाक्य- मुनिर् भगवान् सकलं मन्त्र-कुलं महत् ।
मन्त्र-विद्या-धर-कुलं व्यवलोक्य कुल-त्रयम् ॥ २३ ॥
लोक-लोकोत्तर-कुलं लोकालोक-कुलं महत् ।
महा-मुद्रा-कुलं चाग्र्यं महोष्णीष-कुलं महत् ॥ २४ ॥

॥ षट्-कुलावलोकन-गाथे द्वे ॥

इमां षण्-मन्त्र-राजानं संयुक्ताम् अद्वयोदयाम् ।
अनुत्पाद-धर्मिणीं गाथां भाषते स्म गिरां पतेः ॥ २५ ॥
अ आ इ ई उ ऊ ए ऐ ओ औ अं अः स्थितो हृदि ।
ज्ञान-मूर्त्तिर् अहं बुद्धो बुद्धानां त्र्यध्व-वर्तिनाम् ॥ २६ ॥
ओं वज्र-तीक्ष्ण-दुःख-च्छेद-प्रज्ञा-ज्ञान-मूर्त्तये ।
ज्ञान-काय-वागीश्वरारपचनाय ते नमः ॥ २७ ॥

॥ माया-जालाभिसम्बोधि-क्रम-गाथास्तिस्रः ॥

तद्यथा भगवान् बुद्धः संबुद्धो ऽकार-सम्भवः ।
अकारः सर्व-वर्णाग्र्यो महार्थः परमाक्षरः ॥ २८ ॥
महा-प्राणो ह्यनुत्पादो वाग्-उदाहार-वर्जितः ।
सर्वाभिलाप-हेत्वग्र्यः सर्व-वाक्-सुप्रभास्वरः ॥ २९ ॥
महा-मह-महा-रागः सर्व-सत्त्व-रतिङ-करः ।
महा-मत-महा-द्वेषः सर्व-क्लेश-महा-रिपुः ॥ ३० ॥
महा-मह-महा-मोहो मूढ-धी-मोह-सूदनः ।
महा-मह-महा-क्रोधो महा-क्रोध-रिपुर् महान् ॥ ३१ ॥
महा-मह-महा-लोभः सर्व-लोभ-निषूदनः ।
महा-कामो महा-सौख्यो महा-मोदो महा-रतिः ॥ ३२ ॥
महा-रूपो महा-कायो महा-वर्णो महा-वपुः ।
महा-नामा महोदारो महा-विपुल-मण्डलः ॥ ३३ ॥
महा-प्रज्ञायुध-धरो महा-क्लेशाङ्कुशो ऽग्रणीः ।
महा-यशा महा-कीर्त्तिर् महा-ज्योतिर् महा-द्युतिः ॥ ३४ ॥
महा-माया-धरो विद्वान् महा-मायार्थ-साधकः ।
महा-माया-रति-रतो महा-मायेन्द्रजालिकः ॥ ३५ ॥
महा-दान-पतिः श्रेष्ठो महा-शील-धरो ऽग्रणीः ।
महा-क्षान्ति-धरो धीरो महा-वीर्य-पराक्रमः ॥ ३६ ॥
महा-ध्यान-समाधि-स्थो महा-प्रज्ञा-शरीर-धृक् ।
महा-बलो महोपायः प्रणिधिर् ज्ञान-सागरः ॥ ३७ ॥
महा-मैत्री-मयो ऽमेयो महा-कारुणिको ऽग्रधीः ।
महा-प्रज्ञो महा-धीमान् महोपायो महा-कृती ॥ ३८ ॥
महा-ऋद्धि-बलोपेतो महा-वेगो महा-जवः ।
महर्द्धिको महेशाख्यो महा-बल-पराक्रमः ॥ ३९ ॥
महा-भवाद्रि-संभेत्तामहा-वज्र-धरो घनः ।
महा-क्रूरो महा-रौद्रो महा-भय-भयङ्करः ॥ ४० ॥
महा-विद्योत्तमो नाथो महा-मन्त्रोत्तमो गुरुः ।
महा-यान-नयारूढो महा-यान-नयोत्तमः ॥ ४१ ॥

॥ वज्र-धातु-महा-मण्डल-गाथाश् चतुर्दश ॥

महा-वैरोचनो बुद्धो महा-मौनी महा-मुनिः ।
महा-मन्त्र-नयोद्भूतो महा-मन्त्र-नयात्मकः ॥ ४२ ॥
दश-पारमिता-प्राप्तो दश-पारमिताश्रयः ।
दश-पारमिता-शुद्धिर् दश-पारमिता-नयः ॥ ४३ ॥
दश-भूमीश्वरो नाथो दश-भूमि-प्रतिष्ठितः ।
दश-ज्ञान-विशुद्धात्मा दश-ज्ञान-विशुद्ध-धृक् ॥ ४४ ॥
दशाकारो दशार्थार्थो मुनीन्द्रो दशबलो विभुः ।
अशेष-विश्वार्थ-करो दशाकारवशी महान् ॥ ४५ ॥
अनादिर् निष्प्रपञ्चात्मा शुद्धात्मा तथतात्मकः ।
भूत-वादी यथा-वादी तथा-कारी अनन्य-वाक् ॥ ४६ ॥

अद्वयो ऽद्वय-वादी च भूत-कोटि-व्यवस्थितः ।
नैरात्म्य-सिंह-निर्नादः कु-तीर्थ्य-मृग-भी-करः ॥ ४७ ॥
सर्वत्र-गो ऽमोघ-गतिस् तथागत-मनो-जवः ।
जिनो जितारिर् विजयी चक्र-वर्ती महा-बलः ॥ ४८ ॥
गण-मुख्यो गणाचार्यो गणेशो गण-पतिर् वशी ।
महानुभावो धौरेयो ऽनन्य-नेयो महा-नयः ॥ ४९ ॥
वागीशो वाक्-पतिर् वाग्मी वाचस्पतिर् अनन्त-गीः ।
सत्य-वाक् सत्य-वादी च चतुस्-सत्योपदेशकः ॥ ५० ॥
अवैवर्त्तिको ह्यनागामी खड्गः प्रत्येक-नायकः ।
नाना-निर्याण-निर्यातो महा-भूतैक-कारणः ॥ ५१ ॥
अर्हन् क्षीणास्रवो भिक्षुर् वीत-रागो जितेन्द्रियः ।
क्षेम-प्राप्तो ऽभय-प्राप्तः शीती-भूतो ह्यनाविलः ॥ ५२ ॥
विद्या-ऽऽचरण-सम्पन्नः सुगतो लोक-वित् परः ।
निर्ममो निरहङ्कारः सत्य-द्वय-नये स्थितः ॥ ५३ ॥
संसार-पार-कोटि-स्थः कृत-कृत्यः स्थले स्थितः ।
कैवल्य-ज्ञान-निष्ठचूतः प्रज्ञा-शस्त्र-विदारणः ॥ ५४ ॥
सद्धर्मो धर्म-राड् भास्वाँल् लोकालोक-करः परः ।
धर्मेश्वरो धर्मराजः श्रेयो-मार्गोपदेशकः ॥ ५५ ॥
सिद्धार्थः सिद्ध-सङ्कल्पः सर्व-सङ्कल्प-वर्जितः ।
निर्विकल्पो ऽक्षयो धातुः धर्म-धातुः परो ऽव्ययः ॥ ५६ ॥
पुण्यवान् पुण्य-सम्भारी ज्ञानं ज्ञानाकरं महत् ।
ज्ञानवान् सद्-असज्-ज्ञानी सम्भार-द्वय-संभृतः ॥५७ ॥
शाश्वतो विश्व-राड् योगी ध्यानं ध्येयो धियां पतिः ।
प्रत्यात्म-वेद्यो ह्यचलः परमाद्यस् त्रि-काय-धृक् ॥ ५८ ॥
पञ्च-कायात्मको बुद्धः पञ्च-ज्ञानात्मको विभुः ।
पञ्च-बुद्धात्म-मकुटः पञ्च-चक्षुर् असङ्ग-भृक् ॥ ५९ ॥
जनकस् सर्व-बुद्धानां बुद्ध-पुत्रः परो वरः ।
प्रज्ञाभवोद्भवो ऽयोनिर् धर्म-योनिर् भवान्त-कृत् ॥ ६० ॥
घनैक-सारो वज्रात्मा सद्यो-जातो जगत्-पतिः ।
गगनोद्भवस् स्वयम्भूः प्रज्ञा-ज्ञानानलो महान् ॥ ६१ ॥
वैरोचनो महा-दीप्तिर् ज्ञान-ज्योतिर् विरोचनः ।
जगत्-प्रदीपो ज्ञानोल्को महा-तेजाः प्रभास्वरः ॥ ६२ ॥
विद्या-राजो ऽग्र-मन्त्रेशो मन्त्र-राजो महार्थ-कृत् ।
महोष्णीषो ऽद्भुतोष्णीषो विश्व-दर्शी वियत्-पतिः ॥ ६३ ॥
सर्व-बुद्धात्म-भावाग्र्यो जगद्-आनन्द-लोचनः ।
विश्व-रूपी विधाता च पूज्यो मान्यो महा-ऋषिः ॥ ६४ ॥
कुल-त्रय-धरो मन्त्री महा-समय-मन्त्र-धृक् ।
रत्न-त्रय-धरः श्रेष्ठस् त्रि-यानोत्तम-देशकः ॥ ६५ ॥
अमोघ-पाशो विजयी वज्र-पाशो महा-ग्रहः ।
वज्राङ्कुशो महा-पाशो
॥ सु-विशुद्ध-धर्म-धातु-ज्ञान-गाथाः पादोन-पञ्च-विंशतिः ॥
वज्र-भैरव-भी-करः ॥ ६६ ॥
क्रोध-राट् षण्-मुखो भीमष् षण्-नेत्रष् षड्-भुजो बली ।
दंष्ट्रा-कराल-कङ्कालो हलाहल-शताननः ॥ ६७ ॥
यमान्तको विघ्न-राजो वज्र-वेगो भयङ्करः ।
विघुष्ट-वज्रो हृद्-वज्रो माया-वज्रो महोदरः ॥ ६८ ॥
कुलिशेशो वज्र-योनिर् वज्र-मण्डो नभोपमः ।
अचलैक-जटाटोपो गज-चर्म-पटार्द्र-धृक् ॥ ६९ ॥
हाहा-कारो महा-घोरो हीही-कारो भयानकः ।
अट्ट-हासो महा-हासो वज्र-हासो महा-रवः ॥ ७० ॥
वज्र-सत्त्वो महा-सत्त्वो वज्र-राजो महा-सुखः ।
वज्र-चण्डो महा-मोदो वज्र-हूं-कार-हूं-कृतिः ॥ ७१ ॥
वज्र-बाणायुध-धरो वज्र-खड्गो निकृन्तनः ।
विश्व-वज्र-धरो वज्री एक-वज्री रणं-जहः ॥ ७२ ॥
वज्र-ज्वाला-करालाक्षो वज्र-ज्वाला-शिरोरुहः ।
वज्रावेशो महा-वेशः शताक्षो वज्र-लोचनः ॥ ७३ ॥
वज्र-रोमाङ्कुर-तनुर् वज्र-रोमैक-विग्रहः ।
वज्र-कोटि-नखारम्भो वज्र-सार-घन-च्छविः ॥ ७४ ॥
वज्र-माला-धरः श्रीमान् वज्राभरण-भूषितः ।
हाहाट्टहास-निर्घोषो वज्र-घोषष् षडक्षरः ॥ ७५ ॥
मञ्जु-घोषो महा-नादस् त्रैलोक्यैक-रवो महान् ।
आकाश-धातु-पर्यन्तो घोषो घोषवतां वरः ॥ ७६ ॥
॥ आदर्श-ज्ञान-गाथाः पादोन-सार्ध-दश ॥
तथता-भूत-नैरात्म्यो भूत-कोटिर् अनक्षरः ।
शून्यता-वादि-वृषभो गम्भीरोदार-गर्जनः ॥ ७७ ॥
धर्म-शङ्खो महा-शब्दो धर्म-गण्डी महा-रणः ।
अप्रतिष्ठित-निर्वाणो दश-दिग्-धर्म-दुन्दुभिः ॥ ७८ ॥
अरूपो रूपवान् अग्र्यो नाना-रूपो मनो-मयः ।
सर्व-रूपावभास-श्रीर् अशेष-प्रतिबिम्ब-धृक् ॥ ७९ ॥
अप्रधृष्यो महेशाख्यस् त्रैधातुक-महेश्वरः ।
समुच्छ्रितार्य-मार्ग-स्थो धर्म-केतुर् महोदयः ॥ ८० ॥
त्रैलोक्यैक-कुमाराङ्गः स्थविरो वृद्धः प्रजा-पतिः ।
द्वात्रिंशल्-लक्षण-धरः कान्तस् त्रैलोक्य-सुन्दरः ॥ ८१ ॥
लोक-ज्ञान-गुणाचार्यो लोकाचार्यो विशारदः ।

नाथस् त्राता
गगनाभोग-स
अविद्याण्ड-क
शमिताशेष-
ज्ञानाभिषेक-
त्रि-दुःख-दुः
सर्वावरण-नि
सर्व-क्लेश-म
सर्व-सत्त्व-म
सर्वोपाधि-वि
महा-चिन्ता-
महा-कल्प-त
सर्व-सत्त्वार्थ-
शुभाशुभ-ज्ञः
सत्त्वेन्द्रिय-ज्ञ
गुणी गुण-ज्ञ
सर्व-मङ्गल-
महोत्सवो म
सत्कारस् सत
वरेण्यो वरद
महा-भयारि
शिखी शिख
पञ्चाननः
महा-व्रत-ध
महा-तपास्
ब्रह्म-विद् ब्र
मुक्तिर् मोक्ष
निर्वाणं नि
सुख-दुःखान
अजयो ऽनुप
निष्कलस् स
अरजो विर
सु-प्रबुद्धो
विज्ञान-धर्म
निर्विकल्पो
अनादि-नि
ज्ञानैक-चक्षु

नाथस् त्राता त्रि-लोकाप्तः शरणं तायी निरुत्तरः ।। ८२ ।।
गगनाभोग-संभोगः सर्वज्ञ-ज्ञान-सागरः ।
अविद्याण्ड-कोष-संभेत्ता भव-पञ्जर-दारणः ।। ८३ ।।
शमिताशेष-संक्लेशः संसारार्णव-पार-गः ।
ज्ञानाभिषेक-मकुटः सम्यक्-संबुद्ध-भूषणः ।। ८४ ।।
त्रि-दुःख-दुःख-शमनस् त्र्यन्तो ऽनन्तस् त्रि-मुक्ति-गः ।
सर्वावरण-निर्मुक्त आकाश-समतां गतः ।। ८५ ।।
सर्व-क्लेश-मलातीतस् त्र्यध्वानध्व-गतिं गतः ।
सर्व-सत्त्व-महा-नागो गण-शेखर-शेखरः ।। ८६ ।।
सर्वोपाधि-विनिर्मुक्तो व्योम-वर्त्मनि सुस्थितः ।
महा-चिन्ता-मणि-धरः सर्व-रत्नोत्तमो विभुः ।। ८७ ।।
महा-कल्प-तरुः स्फीतो महा-भद्र-घटोत्तमः ।
सर्व-सत्त्वार्थ-कृत् कर्ता हितैषी सत्त्व-वत्सलः ।। ८८ ।।
शुभाशुभ-ज्ञः काल-ज्ञः समय-ज्ञः समयी विभुः ।
सत्त्वेन्द्रिय-ज्ञो वेल-ज्ञो विमुक्ति-त्रय-कोविदः ।। ८९ ।।
गुणी गुण-ज्ञो धर्म-ज्ञः प्रशस्तो मङ्गलोदयः ।
सर्व-मङ्गल-माङ्गल्यः कीर्त्तिर् लक्ष्मीर् यशः शुभः ।। ९० ।।
महोत्सवो महाश्वासो महानन्दो महा-रतिः ।
सत्कारस् सत्कृतिर् भूतिः प्रमोदश् श्रीर् यशस्-पतिः ।। ९१ ।।
वरेण्यो वरदश् श्रेष्ठः शरण्यः शरणोत्तमः ।
महा-भयारि-प्रवरो निःशेष-भय-नाशनः ।। ९२ ।।
शिखी शिखण्डी जटिलो जटी मौण्डी किरीटिमान् ।
पञ्चाननः पञ्च-शिखः पञ्च-चीरक-शेखरः ।। ९३ ।।
महा-व्रत-धरो मौञ्जी ब्रह्म-चारी व्रतोत्तमः ।
महा-तपास् तपो-निष्ठः स्नातको गौतमो ऽग्रणीः ।। ९४ ।।
ब्रह्म-विद् ब्राह्मणो ब्रह्मा ब्रह्म-निर्वाणम् आप्तवान् ।
मुक्तिर् मोक्षो विमोक्षाङ्गो विमुक्तिः शान्तता शिवः ।।९५।।
निर्वाणं निर्वृतिश् शान्तिः श्रेयो निर्याणम् अन्तकः ।
सुख-दुःखान्त-कृन् निष्ठा वैराग्यम् उपाधि-क्षयः ।। ९६ ।।
अजयो ऽनुपमो ऽव्यक्तो निराभासो निरञ्जनः ।
निष्कलस् सर्व-गो व्यापी सूक्ष्मो बीजम् अनास्रवः ।। ९७ ।।
अरजो विरजो विमलो वान्त-दोषो निरामयः ।
सु-प्रबुद्धो विबुद्धात्मा सर्व-ज्ञः सर्व-वित् परः ।। ९८ ।।
विज्ञान-धर्मतातीतो ज्ञानम् अद्वय-रूप-धृक् ।
निर्विकल्पो निराभोगस् त्र्यध्व-संबुद्ध-कार्य-कृत् ।। ९९ ।।
अनादि-निधनो बुद्ध आदि-बुद्धो निरन्वयः ।
ज्ञानैक-चक्षुर् अमलो ज्ञान-मूर्तिस् तथागतः ।। १०० ।।



वाग्-ईश्वरो महा-वादी वादि-राड् वादि-पुङ्गवः ।
वदतां-वरो वरिष्ठो वादि-सिंहो ऽपराजितः ।। १०१ ।।
समन्त-दर्शी प्रमोद्यस् तेजो-माली सु-दर्शनः ।
श्री-वत्सस् सु-प्रभो दीप्तिर् भा भासुर-कर-द्युतिः ।। १०२ ।।
महा-भिषग्-वरः श्रेष्ठः शल्य-हर्ता निरुत्तरः ।
अशेष-भैषज्य-तरुः क्लेश-व्याधि-महा-रिपुः ।। १०३ ।।
त्रैलोक्य-तिलकः कान्तः श्रीमान् नक्षत्र-मण्डलः ।
दश-दिग्-व्योम-पर्यन्तो धर्म-ध्वजा-महोच्छ्रयः ।। १०४ ।।
जगच्-छत्रैक-विपुलो मैत्री-करुण-मण्डलः ।
पद्म-नर्त्तेश्वरः श्रीमान् रत्न-च्छत्रो महाविभुः ।। १०५ ।।
सर्व-बुद्ध-महाराजस् सर्व-बुद्धात्म-भाव-धृक् ।
सर्व-बुद्ध-महायोगस् सर्व-बुद्धैक-शासनः ।। १०६ ।।
वज्र-रत्नाभिषेक-श्रीः सर्व-रत्नाधिपेश्वरः ।
सर्व-लोकेश्वर-पतिः सर्व-वज्र-धराधिपः ।। १०७ ।।
सर्व-बुद्ध-महा-चित्तः सर्व-बुद्ध-मनो-गतिः ।
सर्व-बुद्ध-महा-कायः सर्व-बुद्ध-सरस्वती ।। १०८ ।।
वज्र-सूर्यो महा-लोको वज्रेन्दु-विमल-प्रभः ।
विरागादि-महा-रागो विश्व-वर्णोज्ज्वल-प्रभः ।। १०९ ।।
संबुद्ध-वज्र-पर्यङ्को बुद्ध-संगीति-धर्म-धृक् ।
बुद्ध-पद्मोद्भवः श्रीमान् सर्वज्ञ-ज्ञान-कोष-धृक् ।। ११० ।।
विश्व-माया-धरो राजा बुद्ध-विद्या-धरो महान् ।
वज्र-तीक्ष्णो महा-खड्गो विशुद्धः परमाक्षरः ।। १११ ।।
दुःख-च्छेद-महायान-वज्र-धर्म-महायुधः ।
जिन-जिग् वज्र-गाम्भीर्यो वज्र-बुद्धिर् यथार्थ-वित् ।।११२।।
सर्व-पारमिता-पूरी सर्व-भूमि-विभूषणः ।
विशुद्ध-धर्म-नैरात्म्यः सम्यग्-ज्ञानेन्दु-हृत्-प्रभः ।। ११३ ।।
माया-जाल-महोद्योगः सर्व-तन्त्राधिपः परः ।
अशेष-वज्र-पर्यङ्को निःशेष-ज्ञान-काय-धृक् ।। ११४ ।।
समन्त-भद्रस् सु-मतिः क्षिति-गर्भो जगद्-धृतिः ।
सर्व-बुद्ध-महा-गर्भो विश्व-निर्माण-चक्र-धृक् ।। ११५ ।।
सर्व-भाव-स्वभावाग्र्यः सर्व-भाव-स्वभाव-धृक् ।
अनुत्पाद-धर्मा विश्वार्थस् सर्व-धर्म-स्वभाव-धृक् ।। ११६ ।।
एक-क्षण-महा-प्राज्ञः सर्व-धर्मावबोध-धृक् ।
सर्व-धर्माभिसमयो भूतान्त-मुनिर् अग्र-धीः ।। ११७ ।।
स्तिमितस् सु-प्रसन्नात्मा सम्यक्-संबुद्ध-बोधि-धृक् ।
प्रत्यक्षस् सर्व-बुद्धानां ज्ञानार्चिस् सु-प्रभास्वरः ।। ११८ ।।
।। प्रत्यवेक्षण-ज्ञान-गाथा द्वा-चत्वारिंशत् ।।

द-पुङ्गवः ।
ञतः ।। १०१ ।।
र्शनः ।
र-द्युतिः ।। १०२ ।।
त्तरः ।
रपुः ।। १०३ ।।
-मण्डलः ।
च्छ्रयः ।। १०४ ।।
ः ।
विभुः ।। १०५ ।।
धृक् ।
।। १०६ ।।
रः ।
ः ।। १०७ ।।
तः ।
।। १०८ ।।
भः ।
-प्रभः ।। १०९ ।।
क् ।
ष-धृक् ।। ११० ।।
महान् ।
क्षरः ।। १११ ।।
ः ।
थार्थ-वित् ।।११२।।
।
त्-प्रभः ।। ११३ ।।
परः ।
धृक् ।। ११४ ।।
द्-धृतिः ।
-धृक् ।। ११५ ।।
व-धृक् ।
नाव-धृक् ।। ११६ ।।
क् ।
-धीः ।। ११७ ।।
द्ध-बोधि-धृक् ।
भास्वरः ।। ११८ ।।
त्वारिंशत् ।।

इष्टार्थ-साधकः परः सर्वापाय-विशोधकः ।
सर्व-सत्त्वोत्तमो नाथः सर्व-सत्त्व-प्रमोचकः ।। ११९ ।।
क्लेश-संग्राम-शूरैको अज्ञान-रिपु-दर्प-हा ।
धीः शृङ्गार-धरः श्रीमान् वीर-बीभत्स-रूप-धृक् ।। १२० ।।
बाहु-दण्ड-शताक्षेपः पद-निक्षेप-नर्त्तनः ।
श्रीमच्छत-भुजाभोगो गगनाभोग-नर्त्तनः ।। १२१ ।।
एक-पाद-तलाक्रान्त-मही-मण्डल-तले स्थितः ।
ब्रह्माण्ड-शिखराक्रान्त-पादाङ्गुष्ठ-नखे स्थितः ।। १२२ ।।
एकार्थो ऽद्वय-धर्मार्थः परमार्थो ऽविनश्वरः ।
नाना-विज्ञप्ति-रूपार्थश् चित्त-विज्ञान-सन्ततिः ।। १२३ ।।
अशेष-भावार्थ-रतिः शून्यता-रतिर् अग्र-धीः ।
भव-रागाद्यतीतश् च भव-त्रय-महा-रतिः ।। १२४ ।।
शुद्ध-शुभ्राभ्र-धवल-शरच्-चन्द्रांशु सु-प्रभः ।
बालार्क-मण्डल-च्छायो महा-राग-नख-प्रभः ।। १२५ ।।
इन्द्र-नीलाग्र-सच्-चीरो महा-नील-कचाग्र-धृक् ।
महा-मणि-मयूख-श्रीर् बुद्ध-निर्माण-भूषणः ।। १२६ ।।
लोक-धातु-शताकम्पी ऋद्धि-पाद-महा-क्रमः ।
महा-स्मृति-धरस् तत्त्वश् चतुस्-स्मृति-समाधि-राट् ।।१२७।।
बोध्यङ्ग-कुसुमामोदस् तथागत-गुणोदधिः ।
अष्टाङ्ग-मार्ग-नय-वित् सम्यक्-संबुद्ध-मार्ग-वित् ।। १२८ ।।
सर्व-सत्त्व-महा-सङ्गो निस्सङ्गो गगनोपमः ।
सर्व-सत्त्व-मनो-जातः सर्व-सत्त्व-मनो-जवः ।। १२९ ।।
सर्व-सत्त्वेन्द्रियार्थ-ज्ञः सर्व-सत्त्व-मनो-हरः ।
पञ्च-स्कन्धार्थ-तत्त्व-ज्ञः पञ्च-स्कन्ध-विशुद्ध-धृक् ।। १३० ।।
सर्व-निर्याण-कोटि-स्थः सर्व-निर्याण-कोविदः ।
सर्व-निर्याण-मार्ग-स्थः सर्व-निर्याण-देशकः ।। १३१ ।।
द्वादशाङ्ग-भवोत्खातो द्वादशाकार-शुद्ध-धृक् ।
चतुस्-सत्य-नयाकारो अष्ट-ज्ञानावबोध-धृक् ।। १३२ ।।
द्वादशाकार-सत्यार्थः षोडशाकार-तत्त्व-वित् ।
विंशत्याकार-संबोधिर् विबुद्धस् सर्व-वित् परः ।। १३३ ।।
अमेय-बुद्ध-निर्माण-काय-कोटि-विभावकः ।
सर्व-क्षणाभिसमयः सर्व चित्त-क्षणार्थ-वित् ।। १३४ ।।
नाना-यान-नयोपाय-जगद्-अर्थ-विभावकः ।
यान-त्रितय-निर्यात एक-यान-फले स्थितः ।। १३५ ।।
क्लेश-धातु-विशुद्धात्मा कर्म-धातु-क्षयङ्करः ।
ओघोदधि-समुत्तीर्णो योग-कान्तार-निःसृतः ।। १३६ ।।
क्लेशोपक्लेश-संक्लेश-सु-प्रहीण-सवासनः ।

प्रज्ञोपाय-महा-करुणामोघ-जगद्-अर्थ-कृत् ।। १३७ ।।
सर्व-संज्ञा-प्रहीणार्थो विज्ञानार्थो निरोध-धृक् ।
सर्व-सत्त्व-मनो-विषयः सर्व-सत्त्व-मनो-गतिः ।। १३८ ।।
सर्व-सत्त्व-मनो-ऽन्त-स्थस् तच्-चित्त-समताङ्गतः ।
सर्व-सत्त्व-मनो-ह्लादी सर्व-सत्त्व-मनो-रतिः ।। १३९ ।।
सिद्धान्त-विभ्रमापेतः सर्व-भ्रान्ति-विवर्जितः ।
निस्सन्दिग्ध-मतिस् त्र्यर्थः सर्वार्थस् त्रिगुणात्मकः ।। १४० ।।
पञ्च-स्कन्धार्थस् त्रिकालः सर्व-क्षण-विभावकः ।
एक-क्षणाभिसंबुद्धः सर्व-बुद्ध-स्वभाव-धृक् ।। १४१ ।।
अनङ्ग-कायः कायाग्र्यः काय-कोटि-विभावकः ।
अशेष-रूप-सन्दर्शी रत्न-केतुर् महा-मणिः ।। १४२ ।।

।। समता-ज्ञान-गाथाश् चतुर्-विंशतिः ।।

सर्व-संबुद्ध-बोद्धव्यो बुद्ध-बोधिर् अनुत्तरः ।
अनक्षरो मन्त्र-योनिर् महा-मन्त्र-कुल-त्रयः ।। १४३ ।।
सर्व-मन्त्रार्थ-जनको महा-बिन्दुर् अनक्षरः ।
पञ्चाक्षरो महा-शून्यो बिन्दु-शून्यः षड्-अक्षरः ।। १४४ ।।
सर्वाकारो निराकारः षोडशार्धार्ध-बिन्दु-धृक् ।
अकलः कलनातीतश् चतुर्थ-ध्यान-कोटि-धृक् ।। १४५ ।।
सर्व-ध्यान-कलाभिज्ञः समाधि-कुल-गोत्र-वित् ।
समाधि-काय-कायाग्र्यः सर्व-सम्भोग-काय-राट् ।। १४६ ।।
निर्माण-काय-कायाग्र्यो बुद्ध-निर्माण-वंश-धृक् ।
दश-दिग्-विश्व-निर्माणो यथावज् जगद्-अर्थ-कृत् ।। १४७ ।।
देवातिदेवो देवेन्द्रः सुरेन्द्रो दानवाधिपः ।
अमरेन्द्रः सुर-गुरुः प्रमथः प्रमथेश्वरः ।। १४८ ।।
उत्तीर्ण-भव-कान्तार एकः शास्ता जगद्-गुरुः ।
प्रख्यात-दश-दिग्-लोको धर्म-दान-पतिर् महान् ।। १४९ ।।
मैत्री-सन्नाह-सन्नद्धः करुणा-वर्म-वर्मितः ।
प्रज्ञा-खड्ग-धनुर्-बाणः क्लेशाज्ञान-रणं-जहः ।। १५० ।।
मारारिर् मार-जिद् वीरश् चतुर्-मार-भयान्त-कृत् ।
सर्व-मार-चमू-जेता सम्बुद्धो लोक-नायकः ।। १५१ ।।
वन्द्यः पूज्यो ऽभिवाद्यश् च माननीयश् च नित्यशः ।
अर्चनीयतमो मान्यो नमस्यः परमो गुरुः ।। १५२ ।।
त्रैलोक्यैक-क्रम-गतिर् व्योम-पर्यन्त-विक्रमः ।
त्रैविद्यः श्रोत्रियः पूतष् षड्-अभिज्ञष् षड्-अनुस्मृतिः ।।१५३।।
बोधि-सत्त्वो महा-सत्त्वो लोकातीतो महर्द्धिकः ।
प्रज्ञा-पारमिता-निष्ठः प्रज्ञा-तत्त्वत्वम् आगतः ।। १५४ ।।
आत्म-वित् पर-वित् सर्वः सर्वीयो ह्यग्र-पुद्गलः ।

सर्वोपमाम् अतिक्रान्तो ज्ञेयो ज्ञानाधिपः परः ।। १५५ ।।
धर्म-दान-पतिः श्रेष्ठश् चतुर्-मुद्रार्थ-देशकः ।
पर्युपास्यतमो जगतां निर्याण-त्रय-यायिनाम् ।। १५६ ।।
परमार्थ-विशुद्ध-श्रीस् त्रैलोक्य-सुभगो महान् ।
सर्व-सम्पत्-करः श्रीमान् मञ्जुश्रीः श्रीमतां वरः ।।१५७।।

।। कृत्यानुष्ठान-ज्ञान-गाथाः पञ्च-दश ।।

नमस् ते वरद वज्राग्र्य भूत-कोटि नमोऽस्तु ते ।
नमस् ते शून्यता-गर्भ बुद्ध-बोधि नमोऽस्तु ते ।।१५८ ।।
बुद्ध-राग नमस् तेऽस्तु बुद्ध-काम नमो नमः ।
बुद्ध-प्रीति नमस् तुभ्यं बुद्ध-मोद नमो नमः ।। १५९ ।।
बुद्ध-स्मित नमस् तुभ्यं बुद्ध-हास नमो नमः ।
बुद्ध-वाच नमस् तेऽस्तु बुद्ध-भाव नमो नमः ।। १६० ।।
अभवोद्भव नमस् तेऽस्तु नमस् ते बुद्ध-सम्भव ।
गगनोद्भव नमस् तुभ्यं नमस् ते ज्ञान-सम्भव ।। १६१ ।।
माया-जाल नमस् तुभ्यं नमस् ते बुद्ध-नाटक ।
नमस् ते सर्व सर्वेभ्यो ज्ञान-काय नमोऽस्तु ते ।। १६२ ।।

।। इति पञ्च-तथागत-ज्ञान-गाथाः पञ्च ।।

ओं सर्व-धर्माभाव-स्वभाव-विशुद्ध-वज्र: अ आ अं अः ।
प्रकृति-परिशुद्धाः सर्व-धर्माः । यदुत
सर्व-तथागत-ज्ञान-काय-मञ्जुश्री-ज्ञान-परिशुद्धिस् ताम्
उपादायेति
अं अः सर्व-तथागत-हृदयं हर हर । ओं हूं ह्रीः
भगवन् ज्ञान-मूर्त्ते वागीश्वर महावाच
सर्व-धर्म-गगनामल-सुपरिशुद्ध धर्म-धातु-ज्ञान-गर्भ आः ।

।। मन्त्र-विन्यासः ।।

अथ वज्र-धरः श्रीमान् हृष्ट-तुष्टः कृताञ्जलिः ।
प्रणम्य नाथं सम्बुद्धं भगवन्तं तथागतम् ।। १६३ ।।
अन्यैश् च बहु-विधैर् नाथैर् गुह्येन्द्र-वज्रपाणिभिः ।
स सार्धं क्रोध-राजन्यैः प्रोवाचोच्चैर् इदं वचः ।। १६४ ।।
अनुमोदामहे नाथ साधु साधु सुभाषितम् ।
कृतोऽस्माकं महान् अर्थः सम्यक्-सम्बोधि-प्रापकः ।।१६५।।
जगतश् चाप्यनाथस्य विमुक्ति-फल-कांक्षिणः ।
श्रेयोमार्गो विशुद्धोऽयं माया-जाल-नयोदितः ।। १६६ ।।
गम्भीरोदार-वैपुल्यो महार्थो जगद्-अर्थ-कृत् ।
बुद्धानां विषयो ह्येष सम्यक्-सम्बुद्ध-देशितः ।। १६७ ।।

।। इत्युपसंहार-गाथाः पञ्च ।।

**आर्य-माया-जाल-षोडश-साहस्रिकान् महा-योग-तन्त्रान्तःपाति-समाधिजाल-पटलाद्**
**भगवतो मञ्जुश्री-ज्ञान-सत्त्वस्य परमार्था नाम-सङ्गीतिर्**
**भगवत्-तथागत-शाक्यमुनि-भाषिता समाप्ता ।।**

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer